# अथ त्रिसुपर्णसूक्तम्

हरिः ॐ॥ शं नो मित्रः शं वरुणः। शं नो भवत्वर्यमा। शं न इन्द्रो बृहस्पतिः। शं नो विष्णुरुरुक्रमः॥ नमो ब्रह्मणे। नमस्ते वायो। त्वमेव प्रत्यक्षं ब्रह्मासि। त्वमेव प्रत्यक्षं ब्रह्म वदिष्यामि। ऋतं वदिष्यामि। सत्यं वदिष्यामि। तन्मामवतु। तद्वक्तारमवतु। अवतु माम्। अवतु वक्तारम्॥ ॐ शान्तिः शान्तिः शान्तिः॥

ॐ सह नाववतु। सह नौ भुनक्तु। सह वीर्यं करवावहै। तेजस्वि नावधीतमस्तु मा विद्विषावहै। ॐ शान्तिः शान्तिः शान्तिः॥

ब्रह्ममेतु माम्। मधुमेतु माम्। ब्रह्ममेव मधुमेतु माम्। यास्ते सोम प्रजा वत्सोऽभि सो अहम्। दुःष्वप्नहन् दुरुष्षह। यास्ते सोम प्राणाꣳस्ताञ्जुहोमि ॥१॥

त्रिसुंपर्णमयांचितं ब्राह्मणायं दद्यात् । ब्रह्महत्यां वा एते घ्नंन्ति । ये ब्राँह्मणास्त्रिसुंपर्णं पठंन्ति । ते सोमं प्राप्नुंवन्ति । आ सहस्रात् पङ्क्तिं पुनंन्ति । ॐ ॥२॥

ब्रह्मं मेधयाँ । मधुं मेधयाँ । ब्रह्मंमेव मधुं मेधयाँ ॥१॥ अद्यानों देव सवितः प्रजावंत्सावीः सौभंगम् । परा दुःष्वप्नियं सुव॥२॥ विश्वांनि देव सवितर्दुरितानि परांसुव । यद्भद्रं तन्म आसुंव॥३॥ मधुवाता ऋतायते मधुंक्षरन्ति सिन्धंवः । माध्वीर्नः सन्त्वोषंधीः ॥४॥ मधु नक्तंमुतोषसि मधुंमत्पार्थिवं रजंः । मधुद्यौरंस्तु नः पिता ॥५॥ मधुंमान्नो वनस्पतिर्मधुंमाँ अस्तु सूर्यः । माध्वीर्गावों भवन्तु नः॥६॥ य इमं त्रिसुंपर्णमयांचितं ब्राह्मणायं दद्यात् । भ्रूणहत्यां वा एते घ्नंन्ति । ये ब्राँह्मणास्त्रिसुंपर्णं पठंन्ति । ते सोमं प्राप्नुंवन्ति । आसहस्रात्पङ्क्तिं पुनंन्ति । ॐ॥७॥

ब्रह्मं मेधवाँ । मधुं मेधवाँ । ब्रह्मंमेव मधुं मेधवाँ ॥१॥ ब्रह्मा देवानाँ पदवीः कंवीनामृषिर्विप्रांणां महिषो मृगाणांम् । श्येनो गृध्रांणाँ स्वधिंतिर्वनांनाँ सोमंः पवित्रमत्येति रेभन् ॥२॥ हँसः शुंचिषद्वसुंरन्तरिक्षसद्धोता वेदिषदतिंथिर्दुरोणसत् । नृषद्वंरसदृंत-सद्व्योमसदब्जा गोजा ऋंतजा अंद्रिजा ऋतं बृहत् ॥३॥ ऋचे त्वां ऋचे त्वा समित्स्रंवन्ति सरितो न धेनाँः । अन्तर्हृदा मनंसा

पूयमा॑नाः । घृतस्य॒ धारा॑ अ॒भिचा॑कशीमि ॥४॥ हि॒र॒ण्ययो॑ वेत॒सो मध्य॑ आसाम् । तस्मि॓॑न्त्सुप॒र्णो म॑धु॒कृत् कु॑ल॒ायी भज॑न्नास्ते॒ मधु॑ देवता॓॑भ्यः । तस्या॑सते॒ हर॑यः स॒प्त तीरे॓॑ स्व॒धां दुहा॑ना अ॒मृत॑स्य॒ धारा॓॑म् ॥५॥ य इ॒दं त्रिसु॑पर्ण॒मया॑चितं ब्राह्म॒णाय॑ दद्यात् । वी॒र॒ह॒त्यां वा ए॒ते घ्नन्ति । ये ब्रा॓॑ह्म॒णास्त्रिसु॑पर्णं॒ पठ॑न्ति । ते सोम॒ं प्राप्नु॑वन्ति । आ॒स॒ह॒स्रात् प॒ङ्क्तिं पुन॑न्ति । ॐ ॥६॥

ॐ शं नो॑ मि॒त्रः शं वरु॑णः । शं नो॑ भवत्वर्य॒मा । शं न॒ इन्द्रो॒ बृह॒स्पति॑ः । शं नो॒ विष्णु॑रुरुक्र॒मः । नमो॒ ब्रह्म॑णे । नम॑स्ते वायो । त्वमे॒व प्रत्यक्षं॒ ब्रह्मा॑सि । त्वामे॒व प्रत्यक्षं॒ ब्रह्मावा॑दिषम् । ऋ॒तम॑वादिषम् । स॒त्यम॑वादिषम् । तन्मामा॑वीत् । तद्व॒क्तार॑मावीत् । आवी॒न्माम् । आवी॑द्व॒क्तार॓॑म्॥ ॐ स॒ह ना॑ववतु । स॒ह नौ॑ भुनक्तु । स॒ह वी॒र्यं॑ करवावहै । ते॒ज॒स्वि ना॒वधीतमस्तु । मा वि॑द्वि॒षावहै॓॑॥ ॐ शान्तिः शान्तिः शान्ति॑ः॥